Shri Raghunatha Temple MSS. Library,
JAMMU

No. २३१ / घ

Title राक्षसकाव्यव्याख्या काशिका

Author बालकृष्ण : पायगुण्ड:

Extent १५ पत्र Age

Subject काव्य

© Dharmartha Trust. Digitized by eGangotri

राद्रलकाव्यस्य व्याख्या काशिका

~~साहित्यम्~~

~~१११~~ २३१

७ तः ८ – ९ यावत् न्यूनानि

पत्राणि

१५ पत्राणि

© Dharmartha Trust. Digitized by eGangotri

© Dharmartha Trust. Digitized by eGangotri

रा.टी. १ श्रीगणेशाय नमः ॥ गोचरा जजनि जानिमीक्षणं श्रोत्रबद्ध कचसं चयं विभुं । तं नमामि विबुधैर्नसेवितं भक्तकामपरिपू
रणक्षमं ॥१॥ प्रस्फुरद्धृदं तमस्तोमार्तंडं तं नमाम्यहं । यस्यांगेन जनुर्मीलाद्दंतिहस्ताननं स्तुरं ॥२॥ राक्षसा त्यस्यकाव्यस्य
दुर्गहस्य मनोहरा ॥ क्रियते बालकूलीन पाठ्यं टीकाशिका ॥३॥ इहान्वयमुखेनैव सर्वं व्याख्यायते मया ॥ नाम
ले लिख्यते किंचिन्नानपेक्षितमुच्यते ॥४॥ ननु ग्रंथारंभे ग्रंथादौ ग्रंथमध्ये इत्यादि शिष्टाचार प्राप्तमंगलस्यनि

श्रीगणेशाय नमः ॥ कश्चित्कांतं बहुवनं विचरन्नवयस्यो वयस्यां वनाद्वैदनां वनितां वनाद्रौ ॥ तर्वर्षे
रिपुदमुद्रोस्य समुत्थितं स्वनागामिमां मदकलः स कलां बभाषे ॥

विघ्नपरिसमाप्त्यर्थत्वेनावश्यकर्तव्यत्वात् श्रीमदिति वस्तुनिर्देशान्यतमात्मकं मंगलं विधातव्यं अत्र तत्र
तृतीयं मंगलमाचरति । कश्चिदिति । मदकलः मदेन उन्मादेन कलः आप्तः मदव्याप्त इत्यर्थः । यद्वा मदेन
उन्मादेन कलः विभ्रमः मदविभ्रमः । यद्वा मदेन हर्षेण कलविभ्रमः हर्षविभ्रमः यद्वा मदेन उन्मादेन ह
र्षेण वा कलो मंद्रस्वरो यस्य सः कलो मंद्रस्तु गंभीर इत्यमरः मंद्रस्वरः गंभीरस्वर इति वार्थः यद्वा मदेनाम
राद

राम
१

© Dharmartha Trust. Digitized by eGangotri

ता कला स्वरूपं यस्य सः। बहुतरं वनं उदकं यस्मिन् तत्तथा। पयः कीलालममृतं जीवनं भुवनं वनमित्यमरः।
वनं काननं। गहनं काननं वनमिति अमरः॥ पांचापीयं च जले वृंदे संमतौ। विपिने वनमिति कोशश्च। समू
हे च जले रण्ये वनमाहुर्मनीषिणः इति यादवश्च। विचरन् भ्रमन्। वयसि तारुण्ये। वयः पक्षिणि बा
ल्यादौ वयो यौवनमात्रके इति यादवः। तारुण्यं यौवनं समे इत्यमरश्च। तिष्ठतीति वयस्थः। सुपिस्थ
इति कः। तरुण्यां इत्यर्थः। वयस्थस्तरुणो युवेत्यमरः। कश्चित् अनिर्दिष्टनामा नापुरुषः मनुष्यो मानुषो
मर्त्यो मनुजो मानवो नरः॥ ना पुमान् पुरुषो गोधो धवस्था नत्पतिर्धव इत्यमरः। खे आकाशे। नभोंतरि
क्षं गगनमनंतं सुरवर्त्म खं। वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी इत्यमरः। इंद्रिये गगने च खमिति
विश्वश्च। समुत्थितं समुत्पन्नं। इत्पितमित्यर्थः। तरवो वृक्षाः तेषां अद्रिः वह्निः तस्य अरिः उदकं
तद्ददातीति तद्वर्षी अरिद्रदः मेघः आतोनुपसर्गे कः इति कः। तं उदीक्ष्य अवलोक्य। वयसां अध्वीनां
क्रियायत्नामिति यावत्। भार्यामिति तु व्याख्यानमसंगतं सकोश्रमानाभावात्। वनाद्वने द्रष्टव्यं अश्रा

© Dharmartha Trust. Digitized by eGangotri

कु.टी. द्र्सरसां तां। यद्वा वनेन पानीयेन आर्द्रीकृतत्क्षितां क्लिन्नेति यावत् तां। अथवा वनतीति वनं मित्रं
२ मित्रता संभक्तिरिति यावत् पचादित्वान्नलविभुजादित्वाच् अच्। आर्द्रगुणयोगाद् आर्द्रीकरण
वती। वनेन आर्द्रीतां। पानीयं च जले हृदे संभक्तौ विपिने वनमिति कोशः। वनात्मवदनां। वमनं का
ननं जलं वा तत् आत्मा कारणं यस्य सः वनात्मा पद्मः पुष्पं सुवारुंसिवृक्षमिति कोशात् तद्वत् वदनं यस्याः
सा तां पद्मवदनां तद्वत् रक्तवदनां मितियावत्। यद्वा वनं अम्बु तं तत् आत्मा कारणं स्वरूपं वा यस्य सः
वनात्मा चंद्रः तेन तुल्यं मुखं यस्याः सा तां चंद्रतुल्यमुखीं आह्लादजनकवदनां चंद्रवदाह्लादजनिका
मितियावत्। वनितां स्त्रियं। स्त्री नारी वनिता मुग्धा भामिनी भीरु रंगनेति नानार्थः। महिलामितिया
वत्। वनिता महिला तथा तत्पर्यायः यद्वा वनं जलं तद्वत् द्रविता आर्द्रा रसिकं तां अल्पेहृदि रूपं आतिशी
तलत्वेन मधुरत्वेन चातद्वत् सुतां। घकलां समस्तां यद्वा कलया शिल्पेन सहितां कलाः स्यादेकशि
ल्पयोरिति हेमः। यद्वा संपूर्णा कला गुणा यस्यां सा तां। परानुसंधानरूपा संबन्धभावेन रहिताम
राम
२

© Dharmartha Trust. Digitized by eGangotri

मित्यर्थः। यद्वा वनिताविशेषणं कलाभिः सहवर्तमानामित्यर्थः। यद्वा लकलेन मंद्रस्वरेणमुक्तां। इमां वक्ष्य
माणं प्रकारां। गां वाचं बाणं वा चिपशो भूमौ दिविरश्मौ जले क्षितौ। स्वर्गे मातरि वज्रे सौ सुखे सत्वे
च गो ध्वनिरिति नानार्थः। माहेश्वामविगो वाणामितियादवश्चा। वभाषे उक्तवान्। भाषते ईहादे
र्द्विकर्मकत्वात्कर्त्तरि लिट्। कश्चिदिति कामिनोन्नामग्रहणं। तथा चोक्तं याज्ञवल्क्ये। शापरो
गाभिभूतस्य वृद्धस्याभक्ष्यकर्मणः। पापिनः कोपशीलस्य कीर्तनं पापकारणं। शान्तस्य गुर्वभक्त
स्य बलघ्नोप्यपकामिनः। नामसंख्यानवक्तव्यं कश्चिदित्येव निर्दिशेत् इति। उक्तं चालंकारसर
स्वां मपि स्वेडकाव्यमुखे कुर्यात्कश्चिदित्यादिभिः पदैः ---- त्ववश्यं पतुनाम कार्यं सुप्ते भर्तं। यथा
कश्चित्कांता। अत्र स्तु तरस्यामित्यादिध्वनितिदिक्॥१॥

© Dharmartha Trust. Digitized by eGangotri

रा. किमुतेत्वानतत्राह पश्येति हे अंबुद हे अंबुदं मिव दृश्यो यस्याः मातस्त्वं बोधनं हे कमललोचने अंबुदो धन्वंतरे चंद्रेशं
२ देव अंबुपयसं रत्नयोरिति हे मः यस्य चंद्रलोचने इत्यर्थः वियोगीनां चंद्रदर्शनेन यथा कामकल्पज्वरा भिव्यक्तिस्त
थातन्नेत्रदर्शनादपीतिभावः हे अंबुदष्टो दर्शनेऽध्यसे इति हे मः हे अंबुदष्टो वा अंबुनेत्रान्वित्यमरः गिरितटेषु
3. गिरीणां पर्वतानां तटानि कूलानि तेषु शैलानां तिकतीरेषु शैलांतिकतीरेषु गजाग्रदेशे ऽथ गिरिः प्रज्योति

पश्यामि बुद्धगिरितटेषु कुमारतस्मात् भूदेवराजरिपुशत्रुसमावधूतान् वैश्वानरादिजरिपुघ्न
शरापि भूतैर्दृष्ट्वा अत्र शत्रुभिरूपासितपुष्पशोभान् ॥२॥

रुजिवं दुके। शैलेगिरीपके गीर्वाणा वपीतिहे मः। दरिभृद्दस्नलः शृंगीपर्वतः सानुमान् गिरिरिति
नानार्थस्त्र अद्रिगोत्रगिरिग्यावाचलशैलशिलो च्चयाइत्यमरः आसीमोपकंठ कंठ तीरं च पारेरोधा
व धिस्तटमितिनानार्थकोशः कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिष्वित्यमरः कुमातस्मात् कान
कुत्सिता मातात जननी यस्य सः कुमातात स्मानावोधकत्वेन आहूनामयेबालान् वंदे [illegible] राम
३

वानित्यर्थः कुः पापे चेषदर्थे कुत्सायां च निवारणे इति नानार्थः माता गौर्दुर्गा जननी मही इति कोशः। स
वित्री जननी माता जनकः सविता पिता इति कोशः अस्त्र अस्त्री आख्याह्वे अभिधानं च नामधेयं च नाम चेति
अमरः कुमाल्लकः कदंबं स्यात्कदंबः शिरवरोत्तमः। वृक्षजातिः कदंबः स्यात् कदंबो निर्गुणः पुमानि
ति नानार्थः। पश्य अवलीकयत्वमित्यध्याहार्यं। किं विशिष्टान्। भुवि पृथिव्यां दीव्यंतीति भू
देवाः पचादित्वादच्। ब्राह्मणाः भूमि वसुधे त्यादिपदादुत्तरसंस्थिताः। निघतं ते द्विजं प्राहु
र्ये शब्दार्थवाचकाः इति कोशः। तेषां राजा इति। भूदेवराजः राजाहः सखिभ्यः इति टच् चंद्र
इत्यर्थः हंसेऽब्जे गरुडे चंद्रे द्विजराजः इति ध्वनिरिति नानार्थः राजानौ चेंद्रभूपती इति को
शः। तस्य रिपुर्मेघः आच्छादकत्वात् रिपुरिव रिपुरिति वा तस्य शत्रुः वातः प्रक्षेपकत्वात् तन्नि
वारकत्वादिति यावत् तेनावधूतानि कंपितानि इत्यर्थः। पुनः किं विशिष्टान् दकुश्रोत्रपात्रुमि
रूपासितपुष्पशोभानाद्दृशौ नेत्रे ते एव वश्रोत्रे कर्णौ येषां ते स्तथाः तेषां पात्रं वो मयूरास्तैः

© Dharmartha Trust. Digitized by eGangotri

कृ. उपासिता सविता पुष्याणां शोभा येषां तानित्यर्थः। किं विशिष्टैः वैश्वानरारिजरिपुघ्नशराभिभू-
तैः वैश्वानरोऽग्निः ज्वलनो दहनोऽनलः। वैश्वानरः कृशानुश्चेति कोशः। अग्निर्वैश्वानरो व-
ह्निर्वीतिहोत्रो धनंजय इत्यमरश्च। तस्यारिः पानीयं निवारकत्वात् तत्रजाता इति जाः सप्त-
४ म्याजनेर्ड इति ड प्रत्ययः। मत्स्यादय इत्यर्थः तेषां रिपुः केवर्तराजः शंबर इति यावत्। केवर्तोपि
५ च कैवर्तः केवर्तः सलिले चर इति विश्वः। शंवरो दानवांतरे इति नानार्थः तं हतवान् मूलवि-
भुजादित्वात् कः। गमहनेत्युपधालोपः। मदन इत्यर्थः। शंबरारिर्मनसिजः कुसुमेषुरनन्यज
इत्यमरः। तस्य शरा बाणाः। शिलीमुखः शरो बाणो मार्गणो रोपणः कृप इति कोशः। तै र-
भिभूताः पराजिताः सैरित्यर्थः

© Dharmartha Trust. Digitized by eGangotri

ऽत्यद्भ्या हप श्याद्रीति। पश्ये त्वन्नहि अम्बुदकत्वमित्यध्याहार्य। हे कमललोचने त्वमवलोकय यत्किं तदेवाह अ-
द्रीत्यादिना। अद्रिघ्नः अहिर्वृत्रासुरं हतवान् यः मलेति कः गमेति लोपः भुजंगो हि समाख्यातः सिंहिकासु-
तुरप्यहिरिति नानार्थः अहिर्वृत्रासुरे सर्पे स्वचके हीनसम्यदिति विश्वः अहिः सर्पो वृत्रे वप्रे स्यादिति हे-
मः सर्पः पृदाकु भुजगो भुजंगोहि भुजंगम इत्यमरः वृत्रासुर इत्यर्थः। अमरगुरुः अमरानन्देवान् गोपाय

पश्याद्रिसारसदृशीभिरम्भ्राभिरद्रिगाल्लावयत्यमरगुरुधरणीहिमघ्नः॥ तर्वर्यम्ब्रवः सि-
ताभिरसितः शबलः खगाभिर्वीजैः सितैरिव विभाति वनं प्रबुद्धैः॥३॥

तिसः गुपदूष्णालो इत्यतः क्विप्चेति कर्तरि क्विप्। इंद्र इत्यर्थः अमरा निर्जरा देवा इत्यमरः। धरणीप्र-
ध्वी वसुधा धरणी क्षोणिरिति नानार्थः। धराधरित्री धरणी इत्यमरः। अम्भ्राः अम्रभिः प्रत्यक्षाभिः अ-
द्रिसारसदृशीभिः अद्रीणां पर्वतानां सारगरस्तेन स्तुदृश्यस्तुल्याः ताभिः लोहश्यामाभिः अद्रिः
वारिभिः आपः स्त्रीभूम्नि वार्वारि सलिलं कमलं जलमिति अमरः। आल्लावयति आर्द्रीकरोति।

© Dharmartha Trust. Digitized by eGangotri

असितः कृष्ण इत्यर्थः कृष्णे नीलासितश्यामकालश्यामलमेचकाः इत्यमरः। यद्यपि सितमिन्नत्वेनर
५ गोदीनामप्रविप्रतीति संभवेपि तत्रैव कोशे तथा रूढिरवगंतव्या। अब्दः अपो ददातीत्यब्दः आतोनु
5 पसर्गे इति कः। मेघः अब्दः संवत्सरे मेघे मुस्तके गिरिभिद्यपीति हेमः। सिताभिः शुक्लाभिः अवदातः
सितो गौरो वलक्षो धवलोर्जुन इत्यमरः खगाभिश्च्या कादेगछेति ते खगाः अंतात्स्येतेत्यत्र त्वे
नान्यत्रापि दृश्यते इत्यनेन डः। बलाकाः बकपंक्तयो बालाभिः शबलैः शबलीकृतः चित्रीकृत इत्य
र्थः चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः एतादृशः सन् विभाति शोभते। कैः कमिव प्रवृ
द्धैः जातरूपवर्णपत्रैः पुष्पितैर्विकसितैरिति पावतार्पितैः कल्हारैः वाजैः वारिसमानार्थो वाः शब्दः
वार्वारि कं पयोंभोंबुपाथो र्णौ सलिलं जलमिति नानार्थः। तत्र जातानि सप्तम्यां जनेर्डः इति डः तैः
कुमुदैरित्यर्थः कृष्णं शबलीकृतमित्यध्याहृत्य पते कृष्णं वनं जलेषु शबलीकृतं सत्तस्य पाश्र्वे शोभते इत्य
र्थः इति कौतापाकथापतिः अष्टकौं वजले वनमिति रूढकोशः।२ राम

५

गोष्ठंघृतमिति ॥ हिमघ्नः हिमंहंतीति हिमघ्नः अहिघ्नवत् ॥ तुषारघ्नः आदित्यइत्यर्थः ॥ हिमं तुषारे शीते च
हिमश्चंद्रचंदनपादपेइति हेमः अवश्यायस्तुनीहारस्तुषारस्तुहिनं हिममित्यमरः ॥ पतत् अग्रं अग्रे भवंत
त्र भवइत्यधिकारस्थेन यत्प्रत्ययः ॥ पुरःस्थितविनाशके मित्यर्थः ॥ गोष्ठंगवि भूमौ तिष्ठती
ति गोष्ठं सुपिस्थइति कः पृथिवीस्थमित्यर्थः स्वर्गेदिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि विनायके

गोष्ठं घृतं सुघृतवाङ्भिरद्भिरग्र्यं गोभिः समुद्धरति यः कृपया हिमघ्नः । तत्क्षमांबरगतं
शिशिरविनाशसंस्पृशं विस्पृदमानमभिवर्द्धयतीह गोजातम् ॥ ४ ॥

जले नेत्रे गोशब्दः परिकीर्तितइति नानार्थः घृतं नीरमित्यर्थः घृतं सर्पिषि पानीये इति यादवः अद्भिः प्र
त्यक्षाभिः सुघृतवाङ्भिः सुष्ठु घृतं पानीयं वहंतीति क्विप् चेति क्विप् ताभिः गोभिः रश्मिभिः पादो रश्मिर्भि
भास्तेजो विगोभेति प्रभाइति कोशः ॥ पर्वतोपि बोध्यः बहुधा बहुप्रकारं संख्यायाः विधार्थे धाइति
प्रकारे धाप्रत्ययः समुद्धरति ॥ आकर्षयतीति तत् घृतं गव्यं गोषु रश्मिषु भवं गव्यं तत्र भवइत्यधिकारस्थे

© Dharmartha Trust. Digitized by eGangotri

नयत्यत्र तत्पयः रश्मिसंस्थं जलमित्यर्थः। अथवा समस्तं पदं। अंबरगतं सत् अंबरे आकाशः अंबरं व्यो
६ म वस्त्रं वा इति हैमः। व्योम पुष्करमंबरमित्यमरः। अंबरं व्योम्नि वाससीत्यमरः। तत्र गतं प्राप्तं
आकाशस्थं सत् हे इह भूतले गोजान् गवि भूमौ जाताः गोजाः सप्तम्यां जनेर्डः इति डः। तृणादयः
6 तानभिवर्द्धयति। वृद्धं प्रापयति॥ किं विशिष्टं। शिखिजालसंस्थं। शिखा विद्यते यस्य सः शिखी
मत्वर्थे व्रीह्यादित्वादिनिः। वह्निरित्यर्थः वह्निः शिखी शिखी॰ विज्ञो मयूरेपि शिखीरितद्दति धर
णिः। तत्स्वोग्निः शिखी वह्निः पावकश्च शुशुक्षणिरिति नानार्थः। तत्र जातजः सप्तम्यां जनेर्ड
इति डः। धूम इत्यर्थः सः आत्मा स्वरूपं कारणं वा यस्य सः मेघः धूमज्योतिः सलिलमरुतां संनि
पातो मेघ इत्यभियुक्तोक्तेः। तत्र संतिष्ठतीति संस्थः सुपि स्थः इति कः। आतश्चोपसर्गे इति वा पु
नः किं विशिष्टं। विस्फुरमानं। प्रस्फुरमाणं प्रस्फुरत्। इति हे कमललोचने त्वं पश्येति कांतायां क
थयति॥४॥ राम

६

© Dharmartha Trust. Digitized by eGangotri

नत् आत्मा शरीरं कांडं वा यस्य सः घनजात्मा चंद्रः श्री रोदमपनोत्यनेनः तेन तुल्यं वक्त्रं मुखं यस्याः सा चंद्रवदनेत्यर्थः। ४
अप्रवृद्धिति अप्सु जले वृद्धो हती त्यप्सु ट् कमलं रुहवीज जन्मनि प्रादुर्भावे चक्रिप्टे त्यप्रत्ययः तस्य पलाशं पत्रं ला
शो राक्षसः स्यात्ः पलाशं छदनं मतं इति नानार्थः पलाशं छदने स्मृतमिति हेमः अप्रपत्रं लाशं छदनं दलं
पर्णं छदः पुमानित्यमरः। तस्यते नवानिभे सदृशे दृशौ नेत्रे यस्याः सा निभं स्यात् तत्सदृशे व्याजे इति हेमः
घनजात्म वक्त्रा घनात् मेघात् जातं घनजं अप्त्रं व्यापि दृश्यते इति डः वनमित्यर्थः। वा चं स्वरा वा रिच्चर नोति

अप्रवृद्दलाशनिभदृग्घनजात्मवक्त्रा चार्वस्वरेभनिभगा जेगदोः समोरुः॥ श्रीरिव जप्रस
वतुल्यविषा हृदासो ज्ञासं गतापमुदिताप समीक्ष्य वा इं॥५॥

वाचो हृंसः सप्तम्यां जनेर्डः इत्यमिमस्येनत्र विश ~~तुल्यं वक्त्रं तस्य यस्याः सा चंद्रवदनेत्यर्थः~~ द सर्वोपाधि
व्यभिचारार्थं केन परिरवे त्यादि फलके नान्येष्वपि दृश्यते इत्यनेन डः। तस्य स्वर इव स्वरो यस्याः सा उष्ट्रमु
खवत् समासः इभनिभगा। इभो हस्ती दंती स्तंबेरमः कुंभी द्विरदः मातंगगम इति केशः इभस्य स्तंबेरमः
पद्मी वित्यमरः आनेन निभं सदृशं गच्छति सा। अन्येनापि ते तिस्र त्रस्येन अन्यत्रापि दृश्यते इति वा तिविक्रन
डः। पञ्चुतेन तुल्यं गमनं यस्येति तत्प्रत्ययमिति स्पष्टमेव वैयाकरणं गजदोः समोरुः गजस्य हस्तिनः दोः दो

© Dharmartha Trust. Digitized by eGangotri

षा वुभौ करे इति शा द्भेदः दोर्दोषा च भुजो बाहुः पाणिर्हस्तः कुरत्तयेति कोषाश्चाते नगजदोषा शुंडादंडेन
१ समौ ऊरू यस्याः सा। शौरि ध्वजप्रसवतुल्य विषा कृपा।सीरोहस्तं तदस्यास्तीति सारी अत ई निकतावि
दृ तानिः बलभद्रः संकर्षणः शीरपाणिरित्यमरः। तस्य ध्वजस्तालवृक्षः ध्वजं पताका केतु अस्य चिन्हं
१० तद्[illegible]जयंत्यपि। तत्तद्दंतो स्रवाघादिशं भोर्विघ्नकरः स्मर इति नानार्थः ध्वजः पूर्वदिक्योग्रहे। अग्नि अत्रैवि
न्हेपताकायां खट्वांगे शौंडिके पिब्वेतिहेमः। तस्य प्रसवानि फलानि प्रसवः पुष्पफलयोरपत्ये गर्भमोचने
इति हेमः तत्तुल्यो विषं पानीयं। विषं पानीयमित्युक्तं विषमन्नकसोरस इति नानार्थः गरले च जले विष
मिति विश्वः अप्य विषं जलोक्षेति हेमश्च तस्य आकेव आहूस्वारं पय इत्यादि यस्य तद्विषा हूतं द
तः तौ विषाहूयौ स्तनाविति अर्थः। आतोनुपसर्गे कृ इति कः यस्याः सा तथोक्ता। तालफलवत्सीम स्तनी
त्यर्थः नापुरुषेण नापुमान्पुरुष इति नानार्थः। संगतामिलितासंबद्धेति यावत्। प्रसो स्त्री प्रमुदिताप्र
हृष्टा किं कृत्वा वादप्रसमीक्ष्य वाः जलंददातीति वादो मेघः आतोनुपसर्गे कइति कः। तं अवलोक्येत्यादि इति
हृकमलले लोचने तं पश्येपतिकांतायाकपयति॥५॥ राम
१

© Dharmartha Trust. Digitized by eGangotri

स यस्यां श्रवः क्लिरणास्तन्नामप्रवनामयासां तारागावत्तासांपतिर्जोपतिः मनइति ङीविधेषः एवमग्रेपिपुंवद्भावरूतुल्लि
स्तुचिंता अप्राप्तौ डन्नतंदप्रसागर्वच यथास्यात् तथा गच्छतीति तथा उन्नतशिराः स गर्वस्त्र गच्छतीति यावत् । वाचःना
मवन्नामयासांगवां ताभिः परिवृतः समंता वेष्टितः ~~अनड्वां वलीवर्दानां वरः~~ गोनादित्येइति नामार्थः प्रसिद्धः तद्वि
शेषणमाह । विषयेति विषं जलं तन्नामवन्नाम यस्य क्षीरस्य तद्ददति ताभिः क्षीरदाभिः प्रमुदितः प्रहृष्टः उक्षाणां

सर्पिः प्सु नामपतिरुन्नत दर्पगामी वाग्नामभिः परिवृतो विषनामदाभिः ॥ उक्षावरः प्रमुदितः प्रति
नानदीति गर्जत्यमीक्षणहितोच्चयतुल्यरूपः ॥ ६ ॥

वलीवर्दानां वरः श्रेष्ठो वृषभः उक्षावर इति पाठेपि नृपदं गर्जतं ईक्षणेभ्यो नेत्रेभ्यो हितमंजनं तस्योच्चयो
यस्मिन्स्य स वा सत्वं जनपर्वतस्तत्तुल्यं रूपं यस्य तं मेघं अमिलस्य प्रतिस्पर्धयातिशयेन नदीतिलंप इत्ये
ति भावः उक्षा जलधरे वृषे । वरः प्रशस्तादेवानां श्रेष्ठे च दुहितुः पतौ च । वलशैलशिलोच्चया इति कोशः ।६।

© Dharmartha Trust. Digitized by eGangotri

हे वनरुहाक्षि वनं जलं हे कमललयने एनं गाव पयोदं मेतियः कथितानुकथनसत्वादेनादेशः एतेन तद्भावा
देतमिति युक्तमित्यपास्तं प्रत्यक्षनिर्देशोयं गावं पयोदाः क्षीरदा महीतलगतः अस्यः सा सांप्रतिर्द ष्यभः प्रति
स्पर्द्धया गर्जतीवेति त्वं पश्येति संबंधः किं कृत्वा शिरोरुहाभ्यां अंगाभ्यामवनीपृथ्वीभित्वा विदार्य अस्य

एनं पयोदपतिरुन्नमितं पयोदं रवस्थं महीतलगतं प्रतिगर्जतीव ॥ भित्वावनिं वनरुहाक्षि
शिरोरुहाभ्यां सप्रस्थितोऽमृतधारैरभिषिच्यमानः ॥ ७ ॥

मध्यमणिन्यायेनान्वयः किंच तथाकृत्वा अमृतमुदकं तद्धारैर्मेघैरभिषिच्यमानः संप्रस्थितः सम्यक्प्र
स्थितः प्रस्थाने प्रवृत्त इति प्रागवत् पयो जलं दुग्धं चरवमिंद्रियमाकाशं च पयः कीलालममृतमिति
अमरस्वरूपार्थे तलशब्दः अधःस्वरूपयोरस्त्री तलः स्यात् तालमिषे पलमिति विश्वः ॥ ७ ॥

© Dharmartha Trust. Digitized by eGangotri

स्त्रोता तसि जातं स्त्रोतो जं कमलं रेतो जामिति पाठे रेतसि जातं रेतोजं सुवर्णं विख्याता ज्ञातं विख्यातजं रुधिरं विल्कृत
ज मिति पाठेप्येवं न्यधाता ऽनेन स्वस्य द्विवंतं विदिति कृतं ख्यातं तज्जो ऽभूधराः पर्वतास्तेषां धातवो गैरिकाद
यः हे पयोजदल ह्रदरूह हे कमलदल नयने स्त्रोतो जं च विख्यातजं च भूधर धातव श्च तेषां रूपमिव रूपं येषां ई
दृशाः स्वस्या श्रा काशस्याः शुचि शुक्र मासे इति पाठक पार्श्विवादिः ज्येष्ठाषाढ मासयो र्नभस्य नभसो

स्त्रोतोंज विख्यातज भूधर धातु रूपाः स्वस्याः पयः प्रभव ह्रदरू शुचि शुक्र मासे ।। मासो र्नभस्य नभ
सो रति संपतेत तस्तावूं विषं विषधाराः परिनिर्वपंति ।।८।।

भाद्रपद श्रावणयो र्मासो र्मासयो श्चाति संपतेतः ऽप्रति रूपे नपतंतः ऽप्रति संख्यं तइति पाठेप्येवं ऽप्रति
संपतितमंतः विषं जलं तद्धरामेघास्तौ वृमत्वंत मस्तहं विषं जलं प्रति निर्वपंति प्रतिक्षिपंतीति त्वं पश्ये ८
ति संबंधः धातुर्गैरिक मस्थिप च ज्येष्ठ शुक्रः शुचिस्त्वयमिन्लमरः नभाः श्रावणिकश्चसः स्युर्नभ हृ
स्यः प्रौष्ठपद भाद्रेति च शुचि शुक्र मासो रिति शुक्रः पाठः ध्यंतमात्सर्वनिपातः नभस्य नभसो रिति तुचिं

© Dharmartha Trust. Digitized by eGangotri

१२ खस्य योनिः कारणं जलं काष्ठं वा अश्मादेस्तां भक्षयते सः वडवानलोऽन्यो वा वह्निः तस्य ध्वजो धूम
12 स्ततः संभव उत्पत्तिर्येषां तेषां मेघानां भस्त्रोद्भवेति पाठे ध्वेवं निनादं गर्जनशब्दं श्रुत्वा गिरिग
ह्वरस्थः गिरिकंदरासु स्थितः सन् ...व तमोरिश्चंद्रस्तस्य बिंबस्य प्रतिबिंबं प्रतिबिंबं प्रतिचंद्रकं बि
भर्तीति तादृशः पवनमश्नाति पवनाशः सर्पस्तं नाशयति भक्षयतीति पवनाशनाशो मयूरः पद्य

खयोनिभस्मध्वजसंभवानां श्रुत्वा निनादं गिरिगह्वरस्थः ॥ तमोरिबिंबप्रतिबिंबधारी विरौ
ति कांते पवनाशनाशः ॥ ९ ॥

पवनो वायुरशनं भोजनं यस्य तं सर्वमश्नाति सः एतेनान्यव्याख्यानमपास्तं आरौतीति शब्दं क
रोतीति हे कांते त्वं पश्येति संबंधः विरौतीति युक्तः पाठः खमात्मनि योनिरुत्पादने स्थितो तमोरि
श्चंद्रसूर्ययोः भावे निनादे त्यमरः ॥ ९ ॥

© Dharmartha Trust. Digitized by eGangotri

असाविति प्रत्यक्षनिर्देशः गविभूमौ तिष्ठतीति सः भूस्थः कुंकुमं केसरं तद्वद्वपुर्यस्य सः आरक्तः स
ताय श्याश्वाः अद्रय अश्वपर्वताः दैत्याश्च भुजगोत्तमाश्च फणीश्वरास्तेषां शत्रुरिंद्रस्तं गोपायतीति
स्यातिस्वर्ण इन्द्रगोपः प्रतिराजते शोभते तथा अहिहा सर्पहा हिमं हंतीति हिमहाग्निस्तस्याहूयाने

गोष्ठश्च कुंकुमवपुः प्रतिराजते सौ सत्स्यद्रिदैत्यभुजगोत्तमशत्रुगोपः । उर्वीधराभमचिरो
स्थितमध्वरं स्वेच्छयाहिहाप्रमुदितो हिमहाह्वयानः ॥१०॥
का

नामधेयस्य सः शिखीमयूरः । उर्वीधरः पर्वतस्तद्वदाभा यस्य तं श्याममत्युन्नतं अचिरस्थितं इदानीमेवोत्थितं अम्बुधरं जलधरं मेघं स्वेच्छया काशोद्दष्ट्वा प्रमुदितहर्षित एव क्रीडतीति इति
प्राग्वत् शिखिवनस्तु बुधैः श्लोकमयूरब्राह्मण नयः वाजिवाहाविगंधर्वहयसैंधवसप्तमहत्यमरः ॥११॥

© Dharmartha Trust. Digitized by eGangotri

१२ 13 असौ कृष्णो नीलः अम्बरो मेघः जलमजस्रं प्रसृतं क्षरति वर्षति च किं चान्या विमो मे चोरणौ वर्तमा
नौ हस्तिराजाविव मिथः स्पर्द्धमानौ चः समुद्भ्येतुः संभावनेवेलक्षणैर्वा द्विरदा गजास्तेषां वृंदं
समूहस्तन्निभा स्तत्सदृशाः क्षरंतो वर्षंतो न्येऽपरेऽमी मेघाः अमराश्च देवाः सिद्धाश्च विद्या

कृष्णोऽम्बरः क्षरति तोयमसावजस्रमन्या विमोरणगताविव चेभराजौ ॥ अन्येत्वमी
द्विरदवृंदनिभाः क्षरंतः प्रच्छादयंत्यमरसिद्धविमानमार्गं ॥ ११ ॥

धरादयस्तेषां विमानं यानविशेषस्तस्य मार्गमाकाशं प्रच्छादयंति विमानोऽस्त्री देवयाने इति या
दवः सिद्धा गंधर्वजातय इति च ॥ ११ ॥

© Dharmartha Trust. Digitized by eGangotri

खं आकाशं गच्छंतीति खगाः क्षितिधराः पर्वतास्तेषामागमनमाकृतिस्तद्वत्प्रकाशो येषां तद्वन्नीलाः य
द्वा येषामागमनेन क्षितिधराणां प्रकाशस्ताद्दृशा नेमिध्वनिचक्रधारा रथसंभ्रमहस्तीरासभस्त्रगर्दभः
तुरंगमश्चाश्च तेषां तुल्यो घोषो ध्वनिर्येषां ते वाय्वीरितास्तत्प्रेरितास्तेन निक्षिप्ताः खमाकाश

वार्दाः खगाः क्षितिधरागमनप्रकाशा नेमीभरासभतुरंगमतुल्यघोषाः। वाय्वीरिताः ख
मतत्पवनं स्फुरंतो वाभिः क्षितिं घृतधराः परिनिर्वपंति ॥१२॥

मवतत्पव्याप्यवनं जलं स्फुरंतो वर्षतो घृतं जलं बिभ्रतीति घृतधराः वा दामेघाः वार्ददतीति तथा
वार्भिर्जलैः क्षितिं पृथ्वीं परिनिर्वपंति निर्वृतिं नयंतीत्यर्थः ॥ प्राप्तस्त्रीमन्म्नि वावारीत्यमरः गं
धर्वे च खगः ओतो खौ मेघे च पक्षिणीति शब्दार्णवः क्षोणी ज्या काश्यपी क्षितिरित्यमरः ॥१२॥

© Dharmartha Trust. Digitized by eGangotri

१४ एवइति प्रत्यक्षनिर्देशः भुजंगमाः सर्पास्तेषामरिः शत्रुर्गरुडः अंघ्रिपा वृक्षाः पादपा इत्यर्थः तैः शा
नं भोजनं यस्य सः अग्निस्तस्य रिपुः पानीयं तं हंतीति रिपुघ्नः सूर्यस्तस्य सूनुः कर्णस्तस्य रिपुरर्जु
14 नस्तेन समाना अश्वा यस्य सोऽर्जुनवृक्षस्तमारूढेति यस्य स्वनैः शब्दैः प्रमुदितस्य प्रहृष्ट
स्य ममाघास्मिन्नहनि अधिकरणस्य शेषत्वविवक्षायां षष्ठी तालध्वजो बलभद्रस्तस्यावर

एवोंघ्रिपाशनरिपुघ्नसुतारिसाम्यमारूढ्य तिष्ठति सुगात्रि भुजंगमारिः ॥ यस्य स्वनैः प्रमु
दितस्य ममाघ बाले तालध्वजावरजसूनुशराः पतंति ॥ १३ ॥

जः श्रीकृष्णस्तस्य सूनुर्मदनः प्रद्युम्नस्तस्य शरा बाणाः पतंति तत्संविदं कथयंती ति हे सुभ सु
गात्रि शोभनं गात्रं यस्याः सुगात्री तस्याः संबोधनं बाले प्रिये षोडशवार्षिकत्वं पश्येति । बाला षोडश
शाब्दायनीति लब्धजो हलीति वैजयंतीशरो जलेचकांडश्चेति । अत्र सुगात्रीति चिंत्यं पिप्पल्यादित्वं वा

स्थूलगतः कीटः सुउस्रा माता च शृंगिणी त्वमरः उस्रा गावस्तासां विषं गोमयमत्ति भक्षयतीति उस्रामयमिति पाठांतरं तथैव वाजी वारिचरः वार्म्योऽवतीर्योऽतिस्वादतीति तत एषः इति प्रत्यक्षनिर्देशः हरिर्वानरस्तद्वत् दृशो यस्य स चपलनेत्रः वाजा जले जातः द्विजः कच्छपः वार्म्या जलेभ्यः अवतीर्य दशार्धगूढः पंचभिः कच्छपे गूढः परिवृतः स च चरति बहुत्वा द्रुह्य च वनं वार्म्य इति तथा वातापानः सर्पः खशयनो बिलशयनः स्थलस्य स्थलं स्मरति ध्यायति अ

उस्राविषं स्थलगतोत्ति तथैव वार्म्यो वाजी द्विजो हरिदृगेव दशार्धगूढः॥ वातापानः खशयनः स्मरति
स्थलस्य चक्षुः अवावनभयान्सुरशत्रुनामा॥ १४॥

धीगर्भेति षष्ठी खंबिलं स्थली श्चेति पाठांतरं सुरादेवास्तेषां शत्रुः कालनेमिस्तन्नाम कश्चक्षुः अवाः सर्पवि
शेषः वनं जलं तस्माद्भयं स्मरतीत्यर्थः उस्राविषं गोमयं च वाजी मत्स्यजातीयः स्यात् हरिः सिंहे च विलो
चघोटके मर्कटेपि च । वाजी विप्ररदनाद्विजाः इति नानार्थः॥ १५॥

© Dharmartha Trust. Digitized by eGangotri

दक्षीपस्सवान् अश्वमेधो यज्ञस्तस्य तुरगोऽश्व[redacted]स्तत्तस्स दृशः तदेवाह अष्टेति अष्टौ नीलपीतश्वेतरक्तकपि
१५ 15 लपिंगलकडारकर्बुरात्मका वर्णा यस्य सः अहिघ्नो मयूरः न वहुवर्णेतीति वार्दमेघं समाह्वयते हिः पादपूर
णे तस्मात् मेको मंडूकस्तत्पाते नप्रकारेण एवं सर्वधारणे वृक्षायः विलशयः सर्पस्तेनातस्मा वेद्यावाणी

यस्याश्वमेधतुरगप्रतिमोऽष्टवर्णो वार्दं न वह्निरिति समाहूयते ह्यहिघ्नः ॥ मेकस्तत्पेवरवश
याशनवेद्यवाणिः शार्दूकरो स्तनिम्नतं विषराशिमग्नः ॥१५॥

यस्य तादृशः सन् श्वसनाशनवेद्येतिपाठांतरं विषं जलं तस्य राशिर्निधिर्यस्तत्र मग्नः स्थितः सन्नति
भयं अल्पं तत् शार्दूकरो तीत्यर्थः रवराया भाववेद्येत्युचितः पाठः पवनाशनवेद्येति वा रवशायो वा पुर
स्तन पंक्तिरं श्वसनेतिपाठे तु छंदोभंगो दोषः विषं गरलमित्युक्तं विषं च जलमुच्यते ॥१५॥

© Dharmartha Trust. Digitized by eGangotri

थं गनया समेतो मुकुन्दः नापुरुषः विष्किराः पक्षिणस्तेषां वनं विष्किरावणं कोटरेति दीर्घः वनं पुरगेति णत्वं ।
कुमारत्समाना श्रासत्ययस्यतादृशं तन्नामकं कदंबवनं तदुपेत्य गत्वा आक्रीडते किंभूतो नाम मधुकलः म
धुनाम घोषेन विराजमानः तुर्वैलक्षण्ये अन्योपरोयं नाममल्लि वरदं द्रुनीलस्तेन तुल्या आभा यस्य तादृशं दू

ण नाविष्कारावैंधं मुपेत्य कुमारत्सा कुमाक्रीडते मधुकलोंगनया समेतः । अन्यास्त्वयं मल्लि वराध
रुपेत्य गोजं नारामया सह पपः पतिजां वृत्तीते ॥ १६ ॥

वंशाङ्कले गोः पृथ्वी तस्यां जातं समुद्रतं स्थलविशेषं उपेत्य गत्वा रमयतीति रामा स्त्री तया सह पयः पतिः
समुद्रस्तत्र जातां वृत्तीते संभुनक्ति । यद्वा पयसां पति वरुणस्तस्मिन् जाता वारुणीं तां मदिरां वृत्तीते
भुनक्ति वृत्स्नं भक्षौ । संभोगो अगम्यः कुत्सिता अंग्र वामाता पश्येति कदंबवदुति व्युत्पत्ति छलेन कुमारत्ट इत्युक्तो ॥ १६ ॥

© Dharmartha Trust. Digitized by eGangotri

१६ 16 महत्क्षतजं रुधिरं तस्य वर्णस्तस्य निभेव निभा आभा यस्य तत् रक्तं वस्त्रं विभ्रद् दधानः अरुणानि एतानि स
रोरुहाणि कमलानि भिनत्ति उद्भिनत्तीति चः पादपूरणे च किंच तेषु जातं तज्जं तेन रजसा पिञ्जरेणुना
वनितां स्त्रियं वयस्थां युवां अश्रु मुञ्चतीति मुञ्चति अवकिरति अपि विक्षिपति च अभिषिच्यमानः

न रक्तं महत्क्षतजवर्णनिभं दधानो विभ्रन्नरुणानि च भिनत्ति सरोरुहाणि। तज्जेन चापि रजसा व
नितां वयःस्थामप्यश्रु मुञ्चरत्यमृतदैरभिषिच्यमानः॥१७॥

कयाचिद् वनितया क्रीडारसेन पानीये नार्थवशाद्विभक्तिविपरिणामः रत्यमृतदैरभीति पाठेन
काचिदनुपपत्तिमेवैरिति तदर्थः वासः रक्तं प्ररक्तं च पुष्पे इति कोशः शोणितं घुसृणं रक्तं रुधिरं
क्षतजं च मदिति शब्दार्णवः पांशुर्ना न द्वयो रजः वनिता वामलोचना वयस्थो अप्यूनि यत्तुरे इति कोशाः ॥१७॥

राम १६

© Dharmartha Trust. Digitized by eGangotri

अर्द्धः एतत्पंके कर्दमे निमग्नं इभवृंदं हस्तिसमूहं कर्तृ सवारिजलेन सह वर्तमानं गर्जत्तिमियोमस्यास्तेषां सयो
वासो गृहं जलं तद्ददातीति तिमिस्यपदा मेघास्तेषां वृंदं समूहं इव आवभाति शोभते । श्यामलताद्विसाधर्म्यात् वा
यौ त्वाचं द्रस्तस्य लापशतेन विचित्रा विचित्रा तनुर्यस्य सः पाठांतरे वारिजातं वारिजमन्नं वा जीवनं यस्या येषां ते वारिजा
स्तानीमनुष्यास्तेषां नशनं भस्य स्वर्णकपोतः नलं जीवानानत्वात् तेद्ध्रुविचित्रा तनुर्यस्य सर्पः चोचितामरूपौ

पंके निमग्नमिभवृंदमदः सवारि गर्जत्तिमिस्यपदवृंदमिवावभाति ॥ वायौ स्तलापशतविचित्रतनु
स्सुवर्णी योषिद् हृतः समदनः प्रतिरोरवीति ॥ १७ ॥

वृतो वेष्टितः सहितः समदनः कामाविष्टः सुपर्णी शोभनानि पर्णानि पत्राणि यस्य सुवर्णीति पाठे शो
भनो वर्णो यस्य सः नीलरूपवादिति प्रयोगः मयूरः प्रतिरोरवीति अत्यंतं रौति त्वर्पः । सयोना
शानि वासयोः तिमिर्मत्स्यविशेषः स्यात् स्त्रियां मत्तिरित्यनुस्मृतिरिति ॥ १८ ॥

© Dharmartha Trust. Digitized by eGangotri

17

११ विस्फारिताध्वररवेण विसर्पित जलदनादेन संत्रासितश्चालितः स्वादितो वारिदं सुः स्तुमिष्कुत्तस्त्कामः का
मुकः एषोयं हरिर्वानरः अनोकहनिष्कुटस्थः शाल तरुकोटरस्थः संलीयते तडितं विद्युतं अपि वीक्ष्य
दृष्ट्वा विस्त्रः उद्विग्नः स्वात्मं विलाद्विलं महत्तरमतिमहत् अस्त्रोप्रलप्ताः समनुप्रविष्टो दूरं प्रविष्टः इत्य

विस्फारितांवररवेन हरिं सुरेष संत्रासितो हरिरनोकहनिष्कुटस्थः। संलीयते तडितमप्यभि
वीक्ष्य विग्नः स्वात्मं महत्तरमसौ समनुप्रविष्टः॥१९॥

र्थः विस्फारितांवरेति पाठे विस्फारितः प्रकटीकृतोंवरे आकाशे रवो येनेति स्फुलत्ता जलदउद्भवे।
व्योमपुष्करमंबरं। हरिर्वाजी हरिः कपिः अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः इत्यमरः नि
ष्कुहः कोटरः समाविति शाश्वतार्णवः॥ १९॥

© Dharmartha Trust. Digitized by eGangotri

एतावचयोक्ते एतत्परिमाणमस्य रत्नं दत्तं तस्य तदिति वाङ्नमवचः प्रकृष्टं वचनं शोभनं मनो यस्य स सुम
नाः प्राज्ञः सङ्कल्पमभिधाय समुल्लेति पाठांतरं दिनेदिवसमतीते तस्योजे द्वितीयामभिलाष्य प्रियया तत
या भार्यया सह सार्द्धं रत्नाक्रीडिताहिः पादकूरले अववधारलेवानदीनः अदीनः प्रहृष्टः सन् अप्रदीनवाह
भिः अप्रदीनं यथा तथा यावर्हतीति अप्रदीनवाहस्तैः अश्वचतुर्भिरनडुद्भिर्वलीवर्दैर्युक्तं यानं रथमारुह्य संप्रस्थितो ॥

एतावदुक्तमवचः सुमनाः सङ्कल्परत्नादिनं सह तया प्रियया ह्यदीनः । युक्ते चतुर्भिरनडुद्भिरदीनवा
ड्भिरारुह्य यानमथ संप्रययौ स्वगेहं ॥ १० ॥ इति रत्नसकाव्यं समाप्तं ॥

यानं तरं स्वगेहं स्वमंदिरं संप्रययौ गतवान् । पाठांतरे प्रहृष्टः संप्रस्थितः सन् रुचिरया तया देव्या सह स्व
नगरं प्रति प्रययौ । किंभूतं स्वगेहं स्वस्य गृहं यत्र तत्र यद्वा स्वं च गेहं चेति स्तोयत्रेत्यर्थः स्वं धनं कीदृशः सः
चारुवेषः यद्वा कश्चिदपि विहारस्थलीमागत्य वर्णयित्वा तया स्वकीयया देव्या मनोहरया समं स्वगेहं प्र
ययौ वनभ्रमणकृश्रान्तया प्रियया सार्द्धं स्वनगरं प्रस्थित इत्यन्वयः आकल्पवेषोपेपथ्यौ ॥ ११ ॥ इति पायगुंडोपा
ध्यायबालकृष्णविरचितं रत्नकाव्यव्याख्यानं समाप्तं ॥

© Dharmartha Trust. Digitized by eGangotri

काव्यराज्ञस

३००

© Dharmartha Trust. Digitized by eGangotri